कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M2453

इतिचित्ती

कविकुलबुरू कालिदास संस्कृत विश्वविद्याालय, रामटेक

हस्तलिखित संग्रह

दाखल क. M2453 विषय स्तोत्र

नाव इतिचिल्ली

लेखक/लिपीकार —

पृठ 25 काळ ........ पूर्ण/अपूर्ण

श्रीगणेशायनमः॥हरिःॐ॥सहनाववतु॥
सहनौभुनक्तु॥सहवीर्यंकरवावहै॥तेजस्वि
नावधीतमस्तुमाविद्विषावहै॥ॐ॥शांतिःशां
तिःशांतिः॥ब्रह्मविदाप्नोतिपरं॥तदेषाभ्युक्ता
॥सत्यंज्ञानमनंतंब्रह्म॥योवेदनिहितंगुहायां
परमेव्योमन्॥सोश्नुतेसर्वान्कामान्सह॥ब्रह्म
णाविपश्चितेति॥तस्माद्वाएतस्मादात्मनआ

काशः संभूतः॥ आकाशाद्वायुः॥ वायोरग्निः॥ अ
ग्नेरापः॥ अद्भ्यः पृथिवी॥ पृथिव्या ओषधयः॥
ओषधीभ्योऽन्नं॥ अन्नात्पुरुषः॥ स वा एष पुरुषोऽन्न
रसमयः॥ तस्येदमेव शिरः॥ अयं दक्षिणः पक्षः
॥ अयमुत्तरः पक्षः॥ अयमात्मा॥ इदं पुच्छं प्रति
ष्ठा॥ तदप्येष श्लोको भवति॥ १॥ अन्नाद्वै प्रजाः
प्रजायंते॥ याः काश्च पृथिवीं श्रिताः॥ अथो

॥ २॥

अन्नेनैव जीवंति॥ अथैनदपियंत्यंततः॥ अ
न्नंहि भूतानां ज्येष्ठं॥ तस्मात्सर्वौषधमुच्यते
॥ सर्वं वै तेन्नमाप्नुवंति॥ येन्नं ब्रह्मोपासते॥ अ
न्नंहि भूतानां ज्येष्ठं॥ तस्मात्सर्वौषधमुच्यते
॥ अन्नाद्भूतानि जायंते॥ जातान्यन्नेन वर्द्धंते॥
अद्यतेत्ति च भूतानि॥ तस्मादन्नं तदुच्यत इति
॥ तस्माद्वा एतस्मादन्नरसमयात्॥ अन्योंत

र आत्मा प्राणमयः ॥ तेनैष पूर्णः ॥ स वा एष
पुरुषविध एव ॥ तस्य पुरुषविधतां ॥ अन्वयं
पुरुषविधः ॥ तस्य प्राणः एव शिरः ॥ व्यानो द
क्षिणः पक्षः ॥ अपान उत्तरः पक्षः ॥ आकाश
आत्मा ॥ पृथिवी पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको
भवति ॥ २ ॥ प्राणं देवा अनु प्राणंति ॥ मनुष्याः प
शवश्च ये ॥ प्राणो हि भूतानामायुः ॥ तस्मात्सर्व

युषमुच्यते॥ सर्वमेवत आयुर्यंति॥ ये प्राणंब्रह्मो
पासते॥ प्राणोहिभूतानामायुः॥ तस्मात्सर्वायु
षमुच्यतइति॥ तस्यैषएवशारीरआत्मा॥ यःपू
र्वस्य॥ तस्माद्वाएतस्मात्प्राणमयात्॥ अन्योंतर
आत्मामनोमयः॥ तेनैषपूर्णः॥ सवाएषपुरुष
विधएव॥ तस्यपुरुषविधतां॥ अन्वयंपुरुषविधः॥
तस्ययजुरेवशिरः॥ ऋग्दक्षिणःपक्षः॥ सामो

त्तरः पक्षः ॥ आदेश आत्मा ॥ अथर्वांगिरसः पुच्छं
प्रतिष्ठा ॥ तदप्येष श्लोको भवति ॥ ३ ॥ यतो वाचो
निवर्तंते ॥ अप्राप्य मनसा सह ॥ आनंदं ब्रह्मणो
विद्वान् ॥ न बिभेति कदाचनेति ॥ तस्यैष एव शारी
र आत्मा ॥ यः पूर्वस्य ॥ तस्माद्वा एतस्मान्मनोमया
त् ॥ अन्योंतर आत्मा विज्ञानमयः ॥ तेनैष पूर्णः ॥
स वा एष पुरुषविध एव ॥ तस्य पुरुषविधतां ॥ अ

न्वयं पुरुषविधः॥ तस्य श्रद्धैव शिरः॥ ऋतं दक्षि
णः पक्षः॥ सत्यमुत्तरः पक्षः॥ योग आत्मा॥ महः
पुच्छं प्रतिष्ठा॥ तदप्येष श्लोको भवति॥ ५॥ विज्ञा
नं यज्ञं तनुते॥ कर्माणि तनुतेऽपि च॥ विज्ञानं देवाः
सर्वे॥ ब्रह्म ज्येष्ठमुपासते॥ विज्ञानं ब्रह्म चेद्वेद॥
तस्माच्चेन्न प्रमाद्यति॥ शरीरे पाप्मनो हित्वा॥ सर्वा
न्कामान्समश्नुत इति॥ तस्यैष एव शारीर आत्मा॥

यः पूर्वस्य ॥ तस्माद्वा एतस्माद्विज्ञानमयात् ॥ अ
न्योंतर आत्मानंदमयः ॥ तेनैष पूर्णः ॥ स वा एष
पुरुषविध एव ॥ तस्य पुरुषविधतां ॥ अन्वयं पु
रुषविधः ॥ तस्य प्रियमेव शिरः ॥ मोदो दक्षिणः
पक्षः ॥ प्रमोद उत्तरः पक्षः ॥ आनंद आत्मा ॥ ब्र
ह्म पुच्छं प्रतिष्ठा ॥ तदप्येष श्लोको भवति ॥ ५ ॥ अ
सन्नेव स भवति ॥ असद्ब्रह्मेति वेद चेत् ॥ अस्ति

ब्रह्मेत्तिचेद्वेद॥ संतमेनंततोविदुरिति॥ तस्यै
षएवशारीरआत्मा॥ यःपूर्वस्य॥ अथातोनुप्र
श्नाः॥ उताविद्वानमुंलोकंप्रेत्य॥ कश्चनगच्छती
॥३॥ आहोविद्वानमुंलोकंप्रेत्य॥ कश्चित्समश्नु
ता॥३उ॥ सोकामयत॥ बहुस्यांप्रजायेयेति॥ स
तपोतप्यत॥ सतपस्तप्त्वा॥ इदंसर्वमसृजत
यदिदंकिंच॥ तत्सृष्ट्वा॥ तदेवानुप्राविशत्॥ त

दनुप्रविश्य॥ सच्चत्यच्चाभवत्॥ निरुक्तंचानि
रुक्तंच॥ निलयनंचानिलयनंच॥ विज्ञानंचा
विज्ञानंच॥ सत्यंचानृतंच सत्यमभवत्॥ यदि
दंकिंच॥ तत्सत्यमित्याचक्षते॥ तदप्येषश्लोको
भवति॥ ६॥ असद्वा इदमग्र आसीत्॥ ततोवै
सदजायत॥ तदात्मानंस्वयमकुरुत॥ तस्मा
त्तत्सुकृतमुच्यत इति॥ यद्वैतत्सुकृतं॥ रसोवै

सः॥ रसं ह्येवायं लब्ध्वाऽऽनंदी भवति॥ कोह्येवा
न्यात्कः प्राण्यात्॥ यदेष आकाश आनंदो न
स्यात्॥ एष ह्येवानंदयाति॥ यदा ह्येवैष एतस्मि
न्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां
विंदते॥ अथ सोऽभयं गतो भवति॥ यदा ह्येवै
ष एतस्मिन्नुदरमंतरं कुरुते॥ अथ तस्य भयं भ
वति॥ तत्वेव भयं विदुषोऽमन्वानस्य॥ तदप्ये

ष श्लोको भवति ॥ ७ ॥ भीषास्माद्वातः पवते ॥ भी
षोदेति सूर्यः ॥ भीषास्मादग्निश्चेंद्रश्च ॥ मृत्युर्धा
वति पंचम इति ॥ सैषानंदस्य मीमांसा भवति ॥
युवा स्यात्साधु युवाध्यायकः ॥ आशिष्ठो दृढिष्ठो
बलिष्ठः ॥ तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्या
त् ॥ स एको मानुष आनंदः ॥ ते ये शतं मानुषा
आनंदाः ॥ १ ॥ स एको मनुष्यगंधर्वाणामानंदः ॥

॥ ६ ॥

श्रोत्रियस्यचाकामहतस्य॥ तेयेशतंमनुष्यगं
धर्वाणामानंदाः॥ सएकोदेवगंधर्वाणामानंदः॥
श्रोत्रियस्यचाकामहतस्य॥ तेयेशतंदेवगंधर्वा
णामानंदाः॥ सएकःपितॄणांचिरलोकलोकानां
मानंदः॥ श्रोत्रियस्यचाकामहतस्य॥ तेयेशतं
पितॄणांचिरलोकलोकानामानंदाः॥ सएकआजा
नजानांदेवानामानंदः॥२॥ श्रोत्रियस्यचाकाम

हतस्य॥ तेयेशतमाजानजानांदेवानामानंदाः॥
सएकःकर्मदेवानांदेवानामानंदाः॥ येकर्मणादे
वानपियंति॥ श्रोत्रियस्यचाकामहतस्य॥ तेये
शतंकर्मदेवानांदेवानामानंदाः॥ सएकोदेवाना
मानंदः॥ श्रोत्रियस्यचाकामहतस्य॥ तेयेशतं
देवानामानंदाः॥ सएकइंद्रस्यानंदः॥३॥ श्रोत्रि
यस्यचाकामहतस्य॥ तेयेशतमिंद्रस्यानंदाः॥

स एको बृहस्पतेरानंदः॥ श्रोत्रियस्य चाकामहतस्य॥ ते ये शतं बृहस्पतेरानंदाः॥ स एकः प्रजापतेरानंदः॥ श्रोत्रियस्य चाकामहतस्य॥ ते ये शतं प्रजापतेरानंदाः॥ स एको ब्रह्मण आनंदः॥ श्रोत्रियस्य चाकामहतस्य॥ ५॥ स यश्चायं पुरुषे॥ यश्चासावादित्ये॥ स एकः॥ स य एवंवित्॥ अस्माल्लोकात्प्रेत्य॥ एतमन्नमयमात्मानमुपसंक्रामति॥

एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनो
मयमात्मानमुपसंक्रामति। एतं विज्ञानमयमा
त्मानमुपसंक्रामति। एतमानंदमयमात्मानमु
पसंक्रामति॥ तदप्येष श्लोको भवति॥ य
तो वाचो निवर्तंते॥ अप्राप्य मनसा सह॥ आनंदं
ब्रह्मणो विद्वान्॥ न बिभेति कुतश्चनेति॥ एतं ह
वाव न तपति॥ किमहं साधु नाकरवं॥ किम

रं पापमकरवमिति ॥ स य एवं विद्वानेते आत्मा
नं स्पृणुते ॥ उभे ह्येवैष एते आत्मानं स्पृणुते ॥
य एवं वेद ॥ इत्युपनिषत् ॥ ९ ॥ सह नाववतु ॥ सह
नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधी
हि. तमस्तु मा विद्विषावहै ॥ ॐ ॥ शांतिः शांतिः शांतिः ॥
ब्रह्मविदिदमयमिदमेवैकविंशतिरन्नादन्नरस
मयात्मा प्राणो व्यानोपान आकाशः पृथिवी पुच्छं ष

त्रिꣳशतिः प्राणं यजु ऋक् सामादेशोऽथर्वांगिरसः
पुच्छं द्वाविꣳशतिर्यतः श्रद्धर्तꣳ सत्यं योगो महोऽष्टा
दश विज्ञानं प्रियं मोदः प्रमोद आनंदो ब्रह्म पुच्छं द्वा
विꣳशतिरसंन्नेवायापाष्टाविꣳशतिरद्वाषोडश भी
षास्मान्मानुषो मनुष्यगंधर्वाणां देवगंधर्वाणां पि
तॄणां चिरलोकलोकानां माजानजानां कर्मदेवानां
ये कर्मणा देवानामिंद्रस्य बृहस्पतेः प्रजापतेर्ब्रह्म

तःसयश्चैसक्रामत्तेकंपंचात्राघतःकुतश्चैनेत
मेकारस्मानवं॥ ब्रह्मविन्नवं॥ सहनाववतु॥ सहनौ
भुनक्तु॥ सहवीर्यंकरवावहै॥ तेजस्विनावधीत
मस्तुमाविद्विषावहै॥ ॐ शांतिः शांतिः शांतिः॥
॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥
॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥ध॥

श्रीगणेशाय नमः॥ हरिः ॐ॥ सह नाववतु॥ स
ह नौ भुनक्तु॥ सह वीर्यं करवावहै॥ तेजस्वि नाव
धीतमस्तु मा विद्विषावहै॥ ॐ॥ शांतिः शांतिः
शांतिः॥ हरिः ॐ॥ भृगुर्वै वारुणिः॥ वरुणं पि
तरमुपससार॥ अधीहि भगवो ब्रह्मेति॥ तस्मै
एतत्प्रोवाच॥ अन्नं प्राणं चक्षुः श्रोत्रं मनो वाच
मिति॥ तं होवाच॥ यतो वा इमानि भूतानि ज

यंते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशं
ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। स तपोतप्यत।
स तपस्तप्त्वा। १। अन्नं ब्रह्मेति व्यजानात्। अन्ना
द्ध्येव खल्विमानि भूतानि जायंते। अन्नेन जाता
नि जीवंति। अन्नं प्रयंत्यभिसंविशंतीति। तद्वि
ज्ञाय। पुनरेव वरुणं पितरमुपससार। अधी
हि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म वि

।।१।।

जिज्ञासस्व ॥ तपोब्रह्मेति ॥ सतपोतप्यत ॥ स
तपस्तप्त्वा ॥ ३ ॥ प्राणोब्रह्मेतिव्यजानात् ॥ प्राण
ध्येवखल्विमानिभूतानिजायंते ॥ प्राणेनजाता
निजीवंति ॥ प्राणंप्रयंत्यभिसंविशंतीति ॥ तद्वि
ज्ञाय ॥ पुनरेववरुणंपितरमुपससार ॥ अधीहि
भगवोब्रह्मेति ॥ तंहोवाच ॥ तपसाब्रह्मविजि
ज्ञासस्व ॥ तपोब्रह्मेति ॥ सतपोतप्यत ॥ सतप

स्तत्वा ॥ ३ ॥ मनोब्रह्मेतिव्यजानात् ॥ मनसोह्ये
वखल्विमानिभूतानिजायंते ॥ मनसाजाता
निजीवंति ॥ मनःप्रयंत्यभिसंविशंतीति ॥ त
द्विज्ञाय ॥ पुनरेववरुणंपितरमुपससार ॥ अ
धीहिभगवोब्रह्मेति ॥ तंहोवाच ॥ तपसाब्रह्म
विजिज्ञासस्व ॥ तपोब्रह्मेति ॥ सतपोतप्यत ॥
सतपस्तप्त्वा ॥ ४ ॥ विज्ञानंब्रह्मेतिव्यजानात् ॥

॥ २ ॥

विज्ञानाद्ध्येवखल्विमानिभूतानिजायंते॥वि
ज्ञानेनजातानिजीवंति॥विज्ञानंप्रयंत्यभि
संविशंतीति॥तद्विज्ञाय॥पुनरेववरुणंपित
रमुपससार॥अधीहिभगवोब्रह्मेति॥तंहो
वाच॥तपसाब्रह्मविजिज्ञासस्व॥तपोब्रह्मेति॥
सतपोतप्यत॥सतपस्तप्त्वा॥५॥आनंदोब्रह्मे
तिव्यजानात्॥आनंदाद्ध्येवखल्विमानिभूता

नि जायंते ॥ आनंदेन जातानि जीवंति ॥ आनं
दं प्रयंत्यभिसंविशंतीति ॥ सैषा भार्गवी वारुणी
विद्या ॥ परमे व्योमन्प्रतिष्ठिता ॥ य एवं वेद प्र
तितिष्ठति ॥ अन्नवानन्नादो भवति ॥ महान्भ
वति प्रजया पशुभिर्ब्रह्मवर्चसेन ॥ महान्की
र्त्या ॥ ६ ॥ अन्नं न निंद्यात् ॥ तद्व्रतं ॥ प्राणो वा अ
न्नं ॥ शरीरमन्नादं ॥ प्राणे शरीरं प्रतिष्ठितं ॥ श

॥ ३ ॥

रीरे प्राणः प्रतिष्ठितः॥ तदेतदन्नमन्ने प्रति
ष्ठितं॥ सयएतदन्नमन्ने प्रतिष्ठितं वेद प्रति
तिष्ठति॥ अन्नवानन्नादो भवति॥ महान्भवति
प्रजया पशुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥ ७॥
अन्नं न परिचक्षीत॥ तद्व्रतं॥ आपो वा अन्नं॥ ज्यो
तिरन्नादं॥ अप्सु ज्योतिः प्रतिष्ठितं॥ ज्योतिष्या
पः प्रतिष्ठिताः॥ तदेतदन्नमन्ने प्रतिष्ठितं॥

सयएतदन्नमन्ने प्रतिष्ठितंवेद प्रतितिष्ठति ।।
अन्नवानन्नादोभवति ।। महान्भवति प्रजयापशु
भिर्ब्रह्मवर्चसेन ।। महान्कीर्त्या ।। ९ ।। अन्नंबहु
कुर्वीत ।। तद्व्रतं ।। पृथिवीवा अन्नं ।। आकाशोन्ना
दः ।। पृथिव्यामाकाशः प्रतिष्ठितः ।। आका
शे पृथिवी प्रतिष्ठिता ।। तदेतदन्नमन्ने प्रतिष्ठि
तं ।। सयएतदन्नमन्ने प्रतिष्ठितंवेद प्रतितिष्ठति

।। १० ।।

इति ॥ अन्नवानंन्नादोभवति ॥ महान्भवति
प्रजयापशुभिर्ब्रह्मवर्चसेन ॥ महान्कीर्त्या ॥
९ ॥ नकंचनवसतौप्रत्याचक्षीत ॥ तद्व्रतं ॥ त
स्माद्ययाकयाचविधयाबह्वन्नंप्राप्नुयात् ॥
अराध्यस्माअन्नमित्याचक्षते ॥ एतद्वैमुख
तोन्नंराद्धं ॥ मुखतोस्माअन्नंराध्यते ॥ एत
द्वैमध्यतोन्नंराद्धं ॥ मध्यतोस्माअन्नंराध्य

ते ॥ एतद्वा अंततोन्नꣳ राद्धं ॥ अंततोस्मा अन्न
ꣳराध्यते ॥ १० ॥ य एवं वेद ॥ क्षेम इति वाचि ॥
योगक्षेम इति प्राणापानयोः ॥ कर्मेति हस्त
योः ॥ गतिरिति पादयोः ॥ विमुक्तिरिति पायौ
॥ इति मानुषीः समाज्ञाः ॥ अथ दैवीः ॥ तृप्ति
रिति वृष्टौ ॥ बलमिति विद्युति ॥ ११ ॥ यश इति
पशुषु ॥ ज्योतिरिति नक्षत्रेषु ॥ प्रजातिरमृ

॥ ५ ॥

तमानंद इत्युपस्थे ॥ सर्वमित्याकाशे ॥ तत्प्रति
ष्ठेत्युपासीत ॥ प्रतिष्ठावान्भवति ॥ तन्मह इत्यु
पासीत ॥ महान्भवति ॥ तन्मन इत्युपासीत ॥ मा
नवान्भवति ॥ १२ ॥ तंनम इत्युपासीत ॥ नम्यं
तेस्मैकामाः ॥ तद्ब्रह्मेत्युपासीत ॥ ब्रह्मवान्भ
वति ॥ तद्ब्रह्मणः परिमर इत्युपासीत ॥ पर्येणं
म्रियंते द्विषतः सपत्नाः ॥ पर्येऽप्रियाभ्रातृव्याः ॥

स यश्चायं पुरुषे । यश्चासावादित्ये ॥ स एकः ॥ १३

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमय

मात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमु

पसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । ए

तं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानं

दमयमात्मानमुपसंक्रम्य । इमांल्लोकान्कामान्नी

कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते । हा

॥ हि ॥

३ वु हा ३ वु हा ३ वु ॥१॥ अहमन्नमहमन्नमहमन्नं
अहमन्नादो ३ हमन्नादो ३ हमन्नादः ॥ अहं श्लोक
कृदहं श्लोककृदहं श्लोककृत् ॥ अहमस्मि प्रथ
मजा ऋतास्य ॥ पूर्वं देवेभ्यो अमृतस्य ना३भायि ॥
यो मा ददाति स इदेव मा३वाः ॥ अहमन्नमन्नम
दंतमा३द्मि ॥ अहं विश्वं भुवनमभ्यभवां ॥ सुवर्ण
ज्योतीः ॥ य एवं वेद ॥ इत्युपनिषत् ॥ रा ॥ अते विधु

त्तिमानेयान्मवसेकोहं इ वुपएवंवेदैकंच ॥ म्र
गुस्तस्मैयतोविद्यांगतितर्हिजिज्ञासस्वतद्ब्रह्मेति
त्रयोदृश्यान्तेप्राणोमनोविज्ञानमितिविज्ञायते
तपस्ताद्वादृश्याद्वादृश्यानंद इति सेषादृश्यान्तेननिंद्या
त्प्राणःशरीरं मन्नंनपरिचक्षीतापोज्योतिरन्नंबहु
कुर्वीतपृथिव्यामाकाशएकोदशैकोदशानकंच
नैकंषष्ठिरेकात्मविपुंशास्तिरेकात्मविपुंशास्तिः ॥ म्र

गुर्यएवंवेदपंचदश॥ सहनाववतु॥ सहनौभुन
क्तु॥ सहवीर्यंकरवावहै॥ तेजस्विनावधीतमस्तुमा
विद्विषावहै॥ ॐ शांति[illegible]तिः शांतिः॥ छ॥ छ॥
॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ[illegible]॥ छ॥ छ॥ छ॥
॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

प्राणः ॥ द्यौपृष्ठं ॥ अंतरिक्षमात्मा ॥ अंगैर्यज्ञं
पृथिवीं शरीरैः ॥ वाचस्पतेऽछिद्रया वाचा
अछिद्रया जुह्वा ॥ दिवि देवावृधं होत्रामे
रयस्व स्वाहा ॥ ॥ सर्यैतेनवं ॥ २ ॥ सुतहवि
र्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजा अ
ग्नीत ॥ अच्युतमना उपवक्ता ॥ अनाधृष्यश्चा
प्रतिधृष्यश्च यज्ञस्याभिगूर्तौ ॥ अयास्य उद्गा

॥ श्रीगणेशाय नमः ॥ हरिः ॐ ॥ तच्छं योरा
वृणीमहे ॥ गातुं यज्ञाय ॥ गातुं यज्ञपतये ॥
दैवी स्वस्तिरस्तु नः ॥ स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वं
जिगातु भेषजं ॥ शंनो अस्तु द्विपदे ॥ शं चतु
ष्पदे ॥ ॐ शांतिः शांतिः शांतिः ॥ ॐ ॥ चित्ति
स्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः ॥
केतो अग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥

ता॥ वाचंस्पते हृद्विधे नामन्॥ विधेम ते ना
म॥ विधेस्त्वमस्माकं नाम॥ वाचःस्पतिः सो
मंमपात्॥ मा दैव्यस्तंतुश्छेदि मा मनुष्यः॥
नमो दिवे॥ नमः पृथिव्यै स्वाहा॥ १॥ अपात्रीणि
च॥ ५॥ तुतिपात् वाग्घोता॥ दीक्षा पत्नी॥ वा
तोध्वर्युः॥ आपोभिगरः॥ मनो हविः॥ तप
सि जुहोमि॥ भूर्भुवः सुवः॥ ब्रह्म स्वयंभु॥ ब्र

त्नेतोस्य पुत्रे स्याः ॥ १ ॥ वाछ्योतानवे ॥ द्वी ब्र
ह्मण एकहोता ॥ सयज्ञः ॥ समेददातु प्रजांप
शून्पुष्टिंयशः ॥ यज्ञश्चमेभूयात् ॥ अग्निर्द्वि
होता ॥ सभर्ता ॥ समेददातु प्रजांपशून्पुष्टिं
यशः ॥ भर्ताचमेभूयात् ॥ पृथिवीत्रिहोता ॥
सप्रतिष्ठा ॥ १ ॥ समेददातु प्रजांपशून्पुष्टिं
यशः ॥ प्रतिष्ठाचमेभूयात् ॥ अंतरिक्षंचतु

होता ॥ स विष्ठाः ॥ स मे ददातु प्रजां पशून्पुष्टिं
यशः ॥ विष्ठाश्च मे मा व्यापत् ॥ वायुः पंचहोता ॥
स प्राणः ॥ स मे ॥ प्राणश्च मे मा व्यापत् ॥ १ ॥ चं
द्रमाः षड्ढोता ॥ स ऋतून्कल्पयाति ॥ स मे ॥
ऋतवश्च मे कल्पंतां ॥ अन्नं सप्तहोता ॥
स प्राणस्य प्राणः ॥ स मे ॥ प्राणस्य च मे प्रा
णो मा व्यापत् ॥ द्यौर्दशहोता ॥ सोऽनाधृष्यः ॥ २ ॥

समे॰॥ अन्नाद्यप्रश्चेन्नयासं॥ आदित्योन
वेहोता॥ सतेजस्वी॥ समे॰॥ तेजस्वीचेन्नया
सं॥ प्रजापतिर्ब्रह्महोता सइदंसर्वं॥ समे॰॥
सर्वंचमेन्नयात॥ प्रतिष्ठा प्राणश्चेमेन्नयाद
नाद्यप्रः सर्वंचमेन्नयात॥ ४॥ ब्राह्मणोयज्ञो
ग्निर्नेतापृथिवीप्रतिष्ठांतरिक्षंविष्ठावायुः
प प्राणश्चंद्रमोक्षृतनन्नृं सप्रोस्य प्राणोयो ॥५॥

र्नाघुष्या आदित्यैः सतेजन्यो प्रजापतिः
सरुद्रं सर्वैः॥ ७॥ अग्निर्यजुर्भिः॥ सविता स्तो
मैः॥ इंद्र उक्थामदैः॥ मित्रावरुणावासिषा॥
अंगिरसो धिष्णियैरग्निभिः॥ मरुतः सदोहवि
र्धानाभ्यां॥ आपः प्रोक्षणीभिः॥ ओषधयो
बर्हिषा॥ अदितिर्वेद्या॥ सोमो दीक्षया॥ ८॥ त्व
ष्टेध्मेन॥ विष्णुर्यज्ञेन॥ वसव आज्येन॥ आदि

स्यादक्षिणाग्निः॥ विश्वेदेवाऋतुर्जा॥ पूष्णस्येगा
क्रोरेण॥ बृहस्पतिःपुरोधया॥ प्रजापतिरुद्गी
थेन॥ अंतरिक्षंपवित्रेणा॥ वायुःपात्रैः॥ अह
ं श्रद्धया॥ ॥ होत्रस्ययापात्रैरेकैच॥ टी॥ सेनेंद्र
स्य॥ येनात्वृहस्पतेः॥ पथ्याप्रहृताः॥ याम्यायेः॥
होत्रा सोमस्य॥ पृथिव्येग्नेः॥ वसूनांगायत्री॥
रुद्राणांत्रिष्टुप्॥ आदित्यानांजगती॥ विष्णोर

तुष्टुकः ॥ वरुणस्य विराट् ॥ यज्ञस्य पंक्तिः ॥
प्रजापतेरनुमतिः ॥ मित्रस्य श्रद्धा ॥ सवितुप्र
सूतिः ॥ सूर्यस्य मरीचिः ॥ चंद्रमसो रोहिणी ॥
ऋषीणामरुंधती ॥ पर्जन्यस्य विद्युत् ॥ चतस्रो
दिशः ॥ चतस्रोवांतरदिशाः ॥ अहश्च रात्रि
श्च ॥ कृषिश्च वृष्टिश्च ॥ त्विषिश्चापचितिश्च ॥
आपश्चौषधयश्च ॥ उर्क्च सूनृता चे देवानांप

त्नेयः ॥ २ ॥ अनुष्टुप्छंदः ॥ षड्ढ ॥ १ ॥ देवस्य त्वा
सवितुः प्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णो
हस्ताभ्यां प्रतिगृह्णामि ॥ राजा त्वा वरुणो न
यतु देवि दक्षिणेग्नये हिरण्यं ॥ तेनामृतत्व
मश्यां ॥ वयो दात्रे ॥ मयो मह्यमस्तु प्रतिगृही
त्रे ॥ क इदं कस्मा अदात् ॥ कामः कामाय ॥ का
मो दाता ॥ १ ॥ कामः प्रतिगृहीता ॥ कामं स

॥ ३ ॥

मुद्र मा विश ॥ कामेन त्वा प्रतिगृह्णामि ॥ का
मैतत्ते ॥ एषा ते काम दक्षिणा ॥ उत्तान स्त्वांगी
रस प्रतिगृह्णातु ॥ सोमाय वासः ॥ रुद्राय
गां ॥ वरुणायाश्वं ॥ प्रजापतये पुरुषं ॥ २ ॥ मन
वे तल्पं ॥ त्वष्ट्रे जां ॥ पूष्णे विं ॥ निर्ऋत्या अश्व
तरगर्दभौ ॥ हिमवतो हस्तिनं ॥ गंधर्वाप्स
राभ्यः स्रगलंकरणे ॥ विश्वेभ्यो देवेभ्यो धान्यं ॥

याचेत्तै॥ ब्रह्मणा ओदनेन॥ समुद्रायापः॥ ७॥
उत्तानायांगीरसायानैः॥ वैश्वानरायपृथ्वै॥
वैश्वानरायपृथ्वै॥ वैश्वानरः प्रत्नथानाक
मारुरुहत्॥ दिवः पृष्ठं मंदमानः सुमन्मभिः॥
सपूर्ववज्जनयंजंतवेधनं॥ समानमज्मा
पर्येतिजागृविः॥ राजात्वावरुणोनय
तुहेविदक्षिणेवैश्वानरायपृथ्वै॥ तेनो

॥७॥

मत्तत्वमङ्ग्यां॥ वयोदात्रे॥ मयोमह्यंमस्तु
प्रतिग्रहीत्रे॥ ८॥ कइदं कस्मा अदात्॥ का
मः कामाय॥ कामो दाता॥ कामः प्रतिग्र
हीता॥ कामं समुद्रमाविश॥ कामेन त्वा
प्रतिगृह्णामि॥ कामैतत्ते॥ एषा ते काम द
क्षिणा॥ उत्तानस्त्वांगीरसः प्रतिगृह्णातु॥ ९॥
दातापुरुषमापः प्रतिग्रहीत्रेनवंच॥ १०॥

सुवर्णं घर्मं परिवेद वेनं ॥ इंद्रस्यात्मानं दश
धा चरंतं ॥ अंतः समुद्रे मनसा चरंतं ॥ ब्रह्मा
न्वविंदद्दशहोतारमर्णे ॥ अंतः प्रविष्टः शा
स्ता जनानां ॥ एकः सन्बहुधा विचारः ॥ शत
ं शुक्राणि यत्रैकं भवंति ॥ सर्वे वेदा यत्रैकं
भवंति ॥ सर्वे होतारो यत्रैकं भवंति ॥ स मान
सीन आत्मा जनानां ॥ १ ॥ अंतः प्रविष्टः शास्ता

॥ ८ ॥

जनानाꣳ सर्वात्मा॥ सर्वाः प्रजा यत्रैकं भवं
ति॥ चतुर्होतारो यत्र संपदं गच्छंति देवैः॥ स
मानसीन आत्माजनानां॥ ब्रह्मेंद्रमग्निं जग
तः प्रतिष्ठां॥ दिव आत्मानꣳ सवितारं बृह
स्पतिं॥ चतुर्होतारं प्रदिशोऽनुक्लृप्तं॥ वाचो
वीर्यं तपसान्वविंदत्॥ अंतःप्रविष्टं कर्ता
रमेतं॥ त्वष्टारꣳ रूपाणि विकुर्वंतं विपश्चं

॥ २ ॥ अमृतस्य प्राणं यज्ञमेतं ॥ चतुर्होतृणामात्मानं कवयो निचिक्युः ॥ अंतः प्रविष्टं कर्तारमेतं ॥ देवानां बंधु निहितं गुहासु ॥ अमृतेन क्लृप्तं यज्ञमेतं ॥ चतुर्होतृणा मात्मानं कवयो निचिक्युः ॥ शतं नियुतः परिवेद विश्वा विश्ववारः ॥ विश्वमिदं वृणाति ॥ इंद्रस्यात्मा निहितः पंचहोता ॥ अमृतं देवानामायुः प्रजानां ॥ ३ ॥

ईदृꣳ राजानꣳ सवितारमेतं॥ वायोरात्मानं
कवयो निचिक्युः॥ रश्मिꣳ रश्मीनां मध्ये तपं
तं॥ ऋतस्य पदे कवयो निपांति॥ य आंडको
शे भुवनं बिभर्ति॥ अनिर्भिन्नः सन्नथ लोका
न्विचष्टे॥ यस्यांडकोशꣳ शुष्ममाहुः प्राणमु
ल्बं॥ तेन क्लृप्तोमृतेनाहमस्मि॥ सुवर्णं को
शꣳ रजसा परिवृतं॥ देवानां वसुधानीं

विराजै ॥ ४ ॥ अमत्तस्य पुंणं तामुक्कंलोवि
चेसते ॥ पाहूंषट्ठोतु नीक्किलोविविसे ॥ य
त्तेवः पंचघोतक्कुसाः ॥ उत्तचोषट्ठामन
सोतक्कुसाः ॥ त ंषट्ठोतारमत्तुभिः कम्म
मानं ॥ अत्तस्यपदेकवयो निपंपात्ति ॥ अंतः
प्रविंछ्वक्तारमेतं ॥ अंतः श्चेद्रमेसिमन
साचरंतं ॥ सेहेव संतं नविजानंति देवाः ॥

इंद्रस्यात्मानꣳ शतधा चरंतं ॥ पु ॥ इंद्रो रा
जा जगतो य ईशे ॥ सप्तहोता सप्तधा विक्लृ
प्तः ॥ परेण तंतुं परिषिच्यमानं ॥ अंतरादि
त्ये मनसा चरंतं ॥ देवानाꣳ हृदयं ब्रह्मा
न्वविंदत् ॥ ब्रह्मैतद्ब्रह्मण उज्जभार ॥ अर्क
ꣳ श्चोतंतꣳ सलिलस्य मध्ये ॥ आयस्मिन्स
प्तपेरवः ॥ मेहंति बहुलाꣳ श्रियं बह्वश्वा

मिंद्र गोमतीं ॥ २ ॥ अच्युतां बहुलां श्रियं ॥
सहरिर्वसुवित्तमः ॥ पर्जन्याय पिन्व
ते ॥ वृक्कुस्यां मिंद्र गोमतीं ॥ अच्युतां ब
हुलां श्रियं ॥ मह्यमिंद्रो नियच्छतु ॥ शा
तं शाता अस्य युक्ता हरीणां ॥ अर्वाजाया
तु वसुभी रश्मिरिंद्रः ॥ प्रमंहमाणो बहुलां
श्रियं ॥ रश्मिरिंद्रः सविता मे नियच्छतु ॥

॥ ११ ॥

॥७॥ ऋतं तेजो मद्युमदिंद्रियं ॥ मय्यग
ग्निर्दधातु ॥ हरिः पतंगः पटरीसुपर्णः ॥
दिविक्षयो नभसा यऽएति ॥ स न इंद्रः का
मवरं ददातु ॥ पंचारं चक्रं परिवर्त्तते पृथु ॥
हिरण्यज्योतिः सरिरस्य मध्ये ॥ अजस्र
ज्योतिर्नभसा सर्पदेति ॥ स न इंद्रः काम
वरं ददातु ॥ सप्त युंजंति रथमेकचक्रं ॥ ८

एको अश्वो वहति सप्तनामा॥ त्रिनाभि चक्रमजरमनर्वं॥ यत्रेमा विश्वा भुवनाधि तस्थुः॥ भद्रं पश्यंत उपसेदुरग्रे॥ तपो दीक्षामृषयः सुवर्विदः॥ ततः क्षत्रं बलमोजश्च जातं॥ तदस्मै देवा अभिसन्नमंतु॥ श्वेतं रश्मिं बोभुज्यमानं॥ अपां नेतारं भुवनस्य गोपां॥ इंद्रं निचिक्युः परमे व्योमन्

नु १ रोहिणीः पिंगला एकरूपाः॥ क्षरंतीः
पिंगला एकरूपाः॥ ज्ञातपं सहस्राणि प्रयु
तो निनाब्यानां॥ अयं यः श्वेतो रश्मिः॥ प
रि सर्वमिदं जगत्॥ प्रजां पशून्धनानि
॥ अस्माकं ददातु॥ श्वेतो रश्मिः परि सर्वं
बभूव॥ सुवन्मह्यं पशून्विश्वरूपान्॥ पतं
गमक्तमसुरस्य मायया॥ १०॥ हृदा पश्यं

न्ति मनसा मनीषिणः॥ समुद्रे अंतः कव
यो विचक्षते॥ मरीचीनां पदमिच्छंति वे
धसः॥ पतंगो वाचं मनसा बिभर्ति॥ तां गं
धर्वो वदद्गर्भे अंतः॥ तां द्योतमानां स्व
र्यं मनीषां॥ ऋतस्य पदे कवयो निपांति॥
ये ग्राम्याः पशवो विश्वरूपाः॥ विरूपाः सं
तो बहुधैकरूपाः॥ अग्निस्तां अग्रे प्रमु

मोस्तु देवः ॥ ११ ॥ प्रजापतिः प्रजया संविदानः ॥ वीतꣳ स्तुके स्तुके ॥ युवमस्मासु नियच्छतं ॥ प्रप्रयज्ञपतिं तिर ॥ ये ग्राम्याः पशवो विश्वरूपाः ॥ विरूपाः संतो बहुधैकरूपाः ॥ तेषाꣳ सप्तानामिह रंतिरस्तु ॥ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ य ऽआरण्याः पशवो विश्वरूपाः ॥ विरूपाः संते

बहुधैकरूपाः ॥१२॥ वायुस्ताꣳ अग्रे प्रमु
मोक्तु देवः ॥ प्रजापतिः प्रजया संविदा
नः ॥ इडायै सृप्तं घृतवच्चराचरं ॥ देवा अन्व
विंदन्गुहाहितं ॥ यऽआरण्याः पशवो वि
श्वरूपाः ॥ विरूपाः संतो बहुधैकरूपाः ॥ ते
षाꣳ सप्तानामिह रंतिरस्तु ॥ रायस्पोषाय
सुप्रजास्त्वाय सुवीर्याय ॥१३॥ आस्माज

नोनंगिकुर्वंतंविपश्चिंप्रजानांचसुधा
नींगिविराजंचरंतंगोमतींमेनियच्छतेकंच
ऋध्योमन्माययोहिवएकेरूपाअशेच॥१३॥
सहस्रसीर्षापुरुषः॥सहस्राक्षःसहस्र
पात्॥सभूमिंविश्वतोवृत्वा॥अत्यतिष्ठद्द
शांगुलं॥पुरुषएवेदंसर्वं॥यद्भूतंयच्च
भव्यं॥उतामृतत्वस्येशानः॥यदन्नेनाति

रोहति॥ एतावानस्यमहिमा॥ अतोज्याया
ंश्चपूरुषः॥१॥ पादोस्यविश्वाभूतानि॥
त्रिपादस्यामृतंदिवि॥ त्रिपादूर्ध्वउदैत्पु
रुषः॥ पादोस्येहाभवात्पुनः॥ ततोविष्व
ङ्क्रामत्॥ साशनानशनेअभि॥ तस्मा
द्विराडजायत॥ विराजोअधिपूरुषः॥ स
जातोअत्यरिच्यत॥ पश्चाद्भूमिमथोपुरः॥

॥६॥ यत्पुरुषेण हविषा ॥ देवा यज्ञमतन्व
त ॥ वसंतो अस्यासीदाज्यं ॥ ग्रीष्म इध्मः श
रद्धविः ॥ सप्तास्यासन्परिधयः ॥ त्रिः सप्तः
समिधः कृताः ॥ देवा यद्यज्ञं तन्वानाः ॥
अबध्नन्पुरुषं पशुं ॥ तं यज्ञं बर्हिषि प्रौक्षन्
पुरुषं जातमग्रतः ॥७॥ तेन देवा अयजंत ॥
साध्या ऋषयश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः ॥

संभृतं पृषदाज्यं॥ पशूꣳस्ताꣳश्चक्रे वाय
व्यान्॥ आरण्यान्ग्राम्याश्चये॥ तस्माद्यज्ञात्स
र्वहुतः॥ ऋचः सामानि जज्ञिरे॥ छंदाꣳ
सि जज्ञिरे तस्मात्॥ यजुस्तस्मादजायत॥
॥७॥ तस्मादश्वा अजायंत॥ ये के चोभयाद
तः॥ गावो ह जज्ञिरे तस्मात्॥ तस्माज्जा
ता अजावयः॥ यत्पुरुषं व्यदधुः॥ कतिधा

॥१३॥

व्यकल्पयन् ॥ मुखंकिमस्यकौबाहू ॥ का
ऊरूपादाउच्येते ॥ ब्राह्मणोस्यमुखमासी
त् ॥ बाहूराजन्यःकृतः ॥ पू ॥ ऊरूतदस्ययद्वै
श्यः ॥ पद्भ्यांशूद्रोअजायत ॥ चंद्रमामन
सोजातः ॥ चक्षोःसूर्योअजायत ॥ मुखादिं
द्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्या
आसीदंतरिक्षं ॥ शीर्ष्णोद्यौःसमवर्तत ॥ प

ध्यां भूमिर्दिशश्श्रोत्रात्॥ तथा लोकाँ अक
ल्पयन्॥१४॥ वेदाहमेतं पुरुषं महांतं॥ आ
दित्यवर्णं तमसस्तुपारे॥ सर्वाणि रूपाणि
विचित्य धीरः नामानि कृत्वाभिवदन्यदा
स्ते॥ धाता पुरस्ताद्यमुदाजहार॥ शक्रः प्र
विद्वान्प्रदिशश्चतस्रः॥ तमेवं विद्वानमृत
इह भवति॥ नान्यः पंथा अयनाय विद्यते॥

यज्ञेन यज्ञमयजंत देवाः ॥ तानि धर्माणि
प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचं
ते ॥ यत्र पूर्वे साध्याः संति देवाः ॥७॥ पुरुषः
पुरो गतो जायत रुतो कल्प यत्रा संदेहच ॥
अद्भ्यः संभूतः पृथिव्यै रसाच्च ॥ विश्वकर्म
णः समवर्तताधि ॥ तस्य त्वष्टा विदधद्रूप
मेति ॥ तत्पुरुषस्य विश्वमाजानमग्रे ॥ वेदा

हमेतंपुरुषंमहांतं॥ आदित्यवर्णंतमसः
परस्तात्॥ तमेवंविद्वानमृतइहभवति॥ ना
न्यःपंथाविद्यतेयनाय॥ प्रजापतिश्चरति
गर्भेअंतः॥ अजायमानोबहुधाविजायते
॥८॥ तस्यधीराःपरिजानंतियोनिं॥ मरीची
नांपदमिच्छंतिवेधसः॥ योदेवेभ्यआतप
ति॥ योदेवानांपुरोहितः॥ पूर्वोयोदेवेभ्यो

॥१६॥

जोतः॥ नमोरुचायब्राह्मये॥ रुचंब्राह्मंजन
यंतः॥ देवाअग्रेतदब्रुवन्॥ यस्त्वैवंब्राह्म
णोविद्यात्॥ तस्यदेवाअसन्वशे॥ श्रीश्चते
लक्ष्मीश्चपत्न्यौ॥ अहोरात्रेपार्श्वे॥ नक्षत्राणि
रूपं॥ अश्विनौव्यात्तं॥ इष्टंमनिषाण॥ अमुं
मनिषाण॥ सर्वंमनिषाण॥ १॥ जायतेवशे
सपतच॥ १२॥ मृतांसन्त्रियमाणोविमती॥

एकोहिवोवृद्ध्यानिविष्टः॥ यदामारं तन्न
येतेसमर्हे॥ निधायमारं पुनरस्तोमेति
तमेवमृत्युममृतं तमाहुः॥ तंभर्त्तारं तमु
गोप्तारमाहुः॥ सभूतोनियमोलोकोबिभर्त्ति
यएनंवेद सत्येनभर्त्तुं॥ सद्योजातंतुतेज
सास्येषः॥१०॥ तुतोजरंतेनजहास्यैके॥११॥ उ
तोबहूनेकमहुजेहार॥ अत्रैकोदेवस्सह

मेव प्राशैः ॥ यस्तहे हृयत आवृन्नवे ॥ सम्यं
चयाणं सन्द्धे ब्रह्मैणेषः ॥ रमेते तस्मिन्नुत
जीर्णेग याने ॥ नेनं जरुत्यरुः सुपूर्वैषु ॥ त्वा
मापो अनु सर्वाश्चरंति जानतीः ॥ वृ संपर्य
सापुनानोः ॥ १० ॥ त्वमग्निणं हुव्यवारुणं समि
से ॥ त्वं मन्ती मोतरिश्वा प्रजानां ॥ ॥ त्वं य
लत्वमुवेयास्सिसोमेः ॥ तवेदु वारुव मायं

ति सर्वे॥ त्वमेकोसिबहूननुप्रविष्टः॥ नम
स्तेअस्तुसुहवोमएधि॥ नमोवामस्तुशृणु
तं हवं मे॥१२॥ प्राणापानावजिरं संचरं
तौ॥ ह्वयामिवांब्रह्मणातूर्तमेतं॥ योमां
द्वेष्टितंजहितंयुवाना॥ प्राणापानौसंवि
दानौजहितं॥ अमुष्यासुनामासंगसाथां
॥१३॥ तंमेदेवाब्रह्मणासंविदानौ॥ वध्या

यदंतं तमरुः पूर्हनामि ॥ असंजजान सत
आबभूव ॥ १३ ॥ यंयंजजान स उ गोपो अस्य ॥
यदा भारं तंद्रयते स भर्तुं ॥ परास्य भारं पु
नरस्तमेति ॥ तदेव त्वं प्राणो अभवः ॥ महा
भोगः प्रजापतेः ॥ भुजः करिष्यमाणः ॥
४ ॥ यद्देवान्प्राणयो नव ॥ १५ ॥ एकं प्रजाना
पुं साध्यात्र च ॥ हरिपुंहरंतमनु यंति देवाः ॥

विश्वसेशानं रघुनंमंतीनां॥ ब्रह्मसरूप
मत्तु मेह मागांत॥ अपंनं मा विवंथीर्गिर्विश्रे
मत्व॥ मा घिहो मस्यो मावंथी:॥ मामे बंल्रु
विवृह्रो मात्र मोषी:॥ पुजं मामेरीरिषुअ
युरुग॥ न्रुच स्लं संत्वारु वि षां वि थे म॥ सघ
ध्वंकमानाय॥ प्रवेपानाय म्रु स्कवे॥१॥ त्रा
स्माआ गां अश्र एवन्॥१५॥ कामे नाजन

यन्नुनः ॥ कामेनमेकामआगात् ॥ हृदया
द्धृदयंमृत्योः ॥ यदमीषामदःप्रियं ॥ तदैतू
पमामभि ॥ परंमृत्योअनुपरेहिपंथां ॥ य
स्तेस्वइतरोदेवयानात् ॥ चक्षुष्मतेशृण्व
तेतेब्रवीमि ॥ मानःप्रजांरीरिषोमोतवी
रान् ॥ प्रपूर्व्यंमनसावंदमानः ॥ नाधमानो
वृषभंचर्षणीनां ॥ यःप्रजानामेकराण्मा

त्तुषीणां॥ मुखंयजेप्रथमजामृतस्य॥ २॥ सु
सवैवीराऽंस्थत्यारिच॥ १६॥ तरणिर्विश्वद
र्शतोज्योतिष्कृदसिसूर्य॥ विश्वमाभासि
रोचनं॥ उपयामगृहीतोसिसूर्यायत्वाभ्रा
जस्वतएषतेयोनिःसूर्यायत्वाभ्राजस्वते
॥ १७॥ आप्यायस्वमदिंतमसोमविश्वेभि
रंशुभिः॥ भवानःसप्रथस्तमः॥ १८॥ ३॥ यु

ष्टे ये पूर्वतरामपश्यन्व्युछंतीमुषसं मर्त्या
सः॥ अस्माभिरु नु प्रतिचक्ष्याभूदो ते यंती
ये अपरीषु पश्यान्॥१९॥ ज्योतिष्मतीं त्वा
सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योति
र्विदं त्वा सादयामि भास्वतीं त्वा सादयामि
ज्वलंतीं त्वा सादयामि मल्मलाभवंतीं त्वा सा
दयामि दीप्यमानां त्वा सादयामि रोचमा

नं त्वा सादयाम्प्सुजं त्वा सादयामि बृह
ज्ज्योतिषं त्वा सादयामि बोधयंतीं त्वा सा
दयामि जाग्रतीं त्वा सादयामि ॥२०॥ प्रया
साय स्वाहायासाय स्वाहा वियासाय स्वाहा
संयासाय स्वाहोद्यासाय स्वाहावयासाय
स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वा
हा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै

स्वाहा॥ ७॥ चित्तꣳसंतानेन भवं यक्ना रुद्रं
तनिम्ना पशुपतिꣳस्थूलहृदयेनाग्निꣳहृ
दयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादे
वमंतःपार्श्वेनौषिष्ठहनꣳशिंगीनिकोश्या
भ्यां॥ २२॥ चित्तमेकं॥ चित्तिः पृथिव्याग्निः स
र्यैते चक्षुर्महा हविर्हिताया च्छोतो ब्रह्मण
एकहोताग्निर्यजुर्भिः सेनेंद्रस्य देवस्य सुवर्णं

घर्मं सहस्रं ज्ञीर्षा ज्ञोमन्त्तोहरिं तरणिरा
प्यायस्वेत्युहेये ज्योतिष्मतीं प्रयासायैचि
त्तमेकेविं शांतिः॥२३॥ चित्तिरिस्मिर्यज्जुमि
रंमृतंस्य प्राणं वायुस्तानू मेन्त्तां प्रयासापढि
पैच्याज्ञात्॥ तच्छंयोरावृणीमहे॥ गातुं यज्ञा
य॥ गातुं यज्ञपतये॥ दैवीं स्वस्तिरस्तु नः॥
स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं॥

॥२४॥

शन्नो अस्तु द्विपदे ॥ शं चतुष्पदे ॥ ॐ शां
तिः शांतिः शांतिः ॥ ध ॥ ध ॥ ध ॥ ध ॥ ध ॥

॥ इति चित्तिः समाप्तः ॥

```
[OrderDescription]
,CREATED=23.01.20 14:18
,TRANSFERRED=2020/01/23 at 14:27:46
,PAGES=86
,TYPE=STD
,NAME=S0002642
,Book Name=M-2453-ITICHILLI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
```

```
FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,
```